श्री बगळामुखी स्तोत्रं 2

श्री बगळामुखी स्तोत्रं 2

अस्य श्रीबगळामुखीमहामंत्रस्य – नारदो भगवान् ऋषिः – अतिजगतीछंदः – श्री बगळामुखी देवता – लां बीजं इं शक्तिः – लं कीलकं-मम दूरस्थानां समीपस्थानां गति मति वाक्त्संभनार्थे जपे विनियोगः

ॐ ह्रीं अंगुष्ठाभ्यां नमः
बगळामुखी तर्जनीभ्यां नमः
सर्वदुष्टानां मध्यमाभ्यां नमः
वाचं मुखं पदं स्तंभय अनामिकाभ्यां नमः
जिह्वां कीलय बुद्धिं विनाशय कनिष्ठिकाभ्यां नमः
ह्रीं ॐ स्वाहा करतलकरपृष्टाभ्यां नमः

ॐ ह्रीं हृदयाय नमः
बगळामुखी शिरसे स्वाहा
सर्वदुष्टानां शिखायै वषत्
वाचं मुखं पदं स्तंभय कवचा हुं
जिह्वां कीलय बुद्धिं विनाशय नेत्रत्रयाय वौषट्
ह्रीं ॐ स्वाहा अस्त्राय फट्
भूर्भुवस्सुवरोमिति दिग्बंधः |

ध्यानं |

पीतांबरां त्रिणेत्रां च द्विभुजां दहनोज्वलां |
शिलापर्वतहस्तां च रिपुकंपां महोत्कटां || 1 ||

गंभीरां च मदोन्मत्तां स्वर्णकांतिसमप्रभां |
वैरिनिर्दळनार्थाय स्मरेत्तां बगळामुखीं || 2 ||

चतुर्भुजां त्रिणयनां कमलासनसंस्थितां |
दक्षिणे मुद्गरं पाशं वामे जिह्वां च वज्रकं || 3 ||

पीतांबरधरां सांद्रां दृढपीनयोधरां |
वैरिवाक्त्संभिनीं देवीं स्मरामि बगळामुखीं || 4 ||

हेमकुंडलभूषांगीं शीतचंद्रार्धशेखरीं |
पीतभूषणभूषाढ्यां स्वर्णसिंहासनेस्थितां || 5 ||

त्रिशूलधारिणीमंबां सर्वसौभाग्यदायिनीं |
सर्वशृंगारवेषाढ्यां भजेत्तां बगळामुखीं || 6 ||

मध्ये सुधाब्धिमणिमंटप रत्न वेद्यां
सिंहासनोपरिगतां परिपीतवर्णां |
पीतांबराभरणमाल्यविभूषितांगीं
देवीं नमामि धृत मुद्गरवैरि जिह्वां || 7 ||

चलत्कनककुंडलोल्लसितचारुगंडस्थलां
लसत्कनकचंपक द्युतिमदर्धेंदु बिंबांचितां |
सदाहितविपक्षकां दळितवैरि जिह्वांचलां
नमामि बगळामुखीं धीमतां वाङ्मनस्स्तंभिनीं || 8 ||

पीयूषो दधिमध्यचारु विलसद्रत्नोज्वले मंटपे
यासिंहासन मौळिपातितरिपु प्रेतासनाध्यासिनीं |
स्वर्णाभां करपीडितारिरशनां भ्राम्यद्गदां बिभ्रतीं
यस्त्वां पश्यति तस्य यांति विलयं सद्योहि सर्वापदः || 9 ||

देवि त्वच्चरणांबुजार्चनकृते यः पीतपुष्पांजलिं
मुद्रां वामकरे निधाय च पुनर्मंत्री मनोज्ञाक्षरीं |
पीठध्यानपरोपि कुंभकवशाद्बीजं स्मरेत्प्रार्थितं
तस्या मित्रचयस्य संसदि मुख स्तंभो भवेत्तत्क्षणात् || 10 ||

(ॐ ह्रीं बगळामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्रीं ॐ स्वाहा)

मंत्रस्तावदयं विपक्षदळने स्तोत्रं पवित्रं च ते
यंत्रंवादिनि यंत्रिणं त्रिजगतां जैत्रं स चित्रं च तत् |
श्रीमातर्बगळेति नाम ललितं यस्यास्ति जंतोर्मुखे
तन्नामस्मरणेन वाग्भवमुख स्तंभोभवेत्तत्क्षणात् || 11 ||

दुष्टस्तंभनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृत्संभनकारणं मृगदृशां चेतस्समाकर्षणं |
सौभाग्यैकनिकेतनं मम दृशां कारुण्यपूर्णेक्षणे
मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः || 12 ||

संख्याग्रे चोरदंड प्रहरणसमये बंधने वैरिमध्ये
विद्यावादे विवादे प्रकटितनृपतौ युद्धकाले निशायां |
वश्ये च स्तंभने वा रिपुवधसमये प्राणबाधे रणे वा
गच्छंतीष्टं त्रिकालं तव पठनमिदं कारयेदाशु धीरः || 13 ||

मातर्भंजय मद्विपक्षवदनं जिह्वां च संकीलय
ब्राह्मीं मुद्रय मुद्रयाशुधिषणामंघ्र्योर्गतिं स्तंभय |
शत्रून् चूर्णय चूर्णयाशु गदया गौरांगि पीतांबरे
विघ्नौघं बगळे हर प्रतिदिनं कौमारि वामेक्षणे || 14 ||

मातर्भैरवि भद्रकाळि विजये वाराहि विश्वाश्रये
श्रीनित्ये बगळे महेशि समये रामे सुरामे रमे |
मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
वंदेहं शरणागतोस्मिकृपया विश्वेश्वरी त्राहि मां || 15 ||

त्वं विद्या परमा त्रिलोकजननी व्योषाननं छेदिनी
योषाकर्षणकारिणी च सुमहाबंधैकसंभेदिनी |
दुष्टोच्चाटनकारिणी रिपुमनस्संदोहसंदायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मास्त्रसारायणी || 16 ||

यः कृतं जपसंख्यानां चिंतितं परमेश्वरी |
शत्रूणां बुद्धिनाशाय गृहाण मदनुग्रहात् || 17 ||

वैडूर्यहारपरिशोभितहेममालां
मध्येतिपीन कुचयोर्धृतपीतवस्त्रां |
व्याघ्राधिरूढ परिपूरित रत्नशोभां
नित्यं स्मरामि बगळां रिपुवक्त्र कीलां || 18 ||

एकाग्र मानसो भूत्वा स्तोष्यत्यंबां सुशोभनां |
रजन्या रचितां मालां करे धृत्वा जपेच्छुचिः || 19 ||

वामे पाणौ तु पाशं च तस्याधस्ताद्धृढं शुभं |
दक्षे करेऽक्षसूत्रं च अधःपद्मं च धारिणीं || 20 ||

चामुंडे चंडिकोष्ट्रे हुतवहदयिते श्यामले श्रीभुजंगी
दुर्गे प्रत्यंगिराद्ये मुररिपुभगिनी भार्गवीवामनेत्रे |
नानारूपप्रभेदे स्थितिलयजननं पालयद्भर्गहृद्ये
विश्वाद्ये विश्वजैत्री त्रिपुरः बगळे विश्ववंद्ये त्वमेका || 21 ||

चक्रं खड्गं मुसलमभयं दक्षिणाभिश्च दोर्भिः
शंखं खेटं हलमपि च गदां बिभ्रतीं वामदोर्भिः |
सिंहारूढामयुगनयनां श्यामलां कंजवक्त्रां
वंदे देवीं सकलवरदां पंचमीं मातृमध्यां || 22 ||

द्वात्रिंशदायुतयुतैश्चतुरष्टहस्तै-
रष्टोत्तरैश्शतकरैश्च सहस्रहस्तैः |
सर्वायुधैरयुत बाहुभिरन्वितां तां
देवीं भजामि बगळां रसनाग्रहस्तां || 23 ||

सर्वतश्शुभकरां द्विभुजां तां
कंबुहेम नवकुंडल कर्णां |
शत्रुनिर्दळनकारणकोपां
चिंतयामि बगळां हृदयाब्जे || 24 ||

जिह्वाग्रमादाय करेण देवीं
वामेन शत्रून् परिपीडयंतीं |
गदाभिघातेन च दक्षिणेन
पीतांबराढ्यां द्विभुजां नमामि || 25 ||

वंदे वारिजलोचनां वसुकरां पीतांबराडंबरां
पीतांभोरुहसंस्थितां त्रिनयनां पीतांगरागोज्ज्वलां |
शब्दब्रह्ममयीं महाकविजयीं त्रैलोक्यसम्मोहनीं
विद्युत्कोटि निभां प्रसन्न बगळां प्रत्यर्थिवाक्त्संभिनीं || 26 ||

दुःखेन वा यदि सुखेन च वा त्वदीयं
स्तुत्वाऽथ नामबगळे समुपैति वश्यं |
निश्चित्य शत्रुमबलं विजयं त्वदंघ्रि
पद्मार्चकस्य भवतीति किमत्र चित्रं || 27 ||

विमोहितजगत्त्रयां वशगतावनवल्लभां
भजामि बगळामुखीं भवसुखैकसंधायिनीं |
गेहं नातति गर्वितः प्रणमति स्त्रीसंगमो मोक्षति
द्वेषी मित्रति पापकृत्सुकृतति क्ष्मावल्लभोधावति || 28 ||

मृत्युर्वैधृतिदूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वंदे भवभीतिभंजनकरीं गौरीं गिरीशप्रियां |
नित्यं यस्तु मनोहरं स्तवमिदं दिव्यं पठेत्सादरं
धृत्वा यंत्रमिदं तथैव समरे बाह्वोः करे वा गळे || 29 ||

राजानो वरयोषितोथकरिणस्सर्वामृगेंद्रा वशाः
स्तोत्रैर्यांति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः |
निर्निद्रे बगळे समुद्रनिलये रौद्र्यादि वाङ्मुद्रिके
भद्रे रुद्रमनोहरे त्रिभुवनत्राणे दरिद्रापहे || 30 ||

सद्रत्नाकर भूमिगोज्वल करी निस्तंद्रि चांद्रानने
नीहाराद्रिसुते निसर्गसरळे विद्ये सुराद्ये नमः |
देवी तस्य निरामयात्मजमुखान्यायूंषि दद्यादिदं
ये नित्यं प्रजपंति भक्ति भरितास्तेभ्यस्स्तवं निश्चितं || 31 ||

नूनं श्रेयो वश्यमारोग्यतां च प्राप्तस्सर्वं भूतले साधकस्तु |
भक्त्या नित्यं स्तोत्रमेतत्पठन्वै विद्यां कीर्तिं वंशवृद्धिं च विंदेत् || 32 ||

इति श्रीरुद्रयामळे श्रीबगळामुखीस्तोत्रं ||